# 40 Branches of Vedic Literature:

## Beginning and Ending Verses

अथ महर्षिवैदिकवाङ्मयस्य चत्वारिंशत्क्षेत्राणाम् आदिरन्त्यसहितपाठः

## ऋग्वेदः

प्रथममन्त्रः

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् १

अन्तिममन्त्रः

स॒मा॒नी व॒ आकू॑तिः समा॒ना हृद॑यानि वः ।
स॒मा॒नम॑स्तु वो॒ मनो॒ यथा॑ वः॒ सु॒स॒हास॑ति ४

## सामवेदः

प्रथमं गानम्

अग्न आ याहि वीतये गृणानो हव्यदातये
नि होता सत्सि बर्हिषि

अन्तिममन्त्रः

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु
स्वस्ति नो बृहस्पतिर्दधातु

## यजुर्वेदः

प्रथममन्त्रः

इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑ः स्थोपा॒यव॑ः स्थ दे॒वो व॑ः सवि॒ता प्रार्प॑यतु॒
श्रेष्ठ॑तमाय॒ कर्म॑णे॒

अन्तिममन्त्रः
अर्वासुरान्वाजि गन्धर्वान्नश्वो मनुष्यान्समुद्रो वा
अश्वस्य योनिस्समुद्रो बन्धुः

# अथर्ववेदः

प्रथममन्त्रः
ये त्रिषप्ताः  परियन्ति विश्वा रूपाणि बिभ्रतः
वचस्पतिर्बला तेषां तन्वो अद्य दधातु मे

अन्तिममन्त्रः
पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः
सहस्रं शंस उत ये गविष्टौ सर्वाँ इत् ताँ उप याता पिबध्यै

# शिक्षा

प्रथमः श्लोकः
अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः

अन्तिमः श्लोकः
त्रिनयमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः
स भवति धनधान्यपशुपुत्रकीर्तिमान्नतुलं च सुखमश्नुते दिवीति दिवीति

# कल्पः

प्रथमः कण्डः
अथ निषेकादिसंस्कारान्व्याख्यास्यामः
ऋतुसंगमनगर्भाधानपुंसवनसीमन्तविष्णुबलिजातकर्म उत्थाननामकरण
अन्नप्राशनप्रवासागमनपिण्डवर्धनचौडकोपनयनपारायणव्रतबन्धविसर्गोपाकर्म
समावर्तनपाणिग्रहणानीत्यष्टादश संस्काराः

अन्तिमः कण्डः
गृहस्थस्यौपासने विच्छिन्ने यदि प्राणोत्क्रान्तिः वृद्धानुज्ञातस्तत्पुत्रः श्रोत्रियागाराद-ग्निमाहृत्य संस्कृतायां भुवि व्याहृतिभिः संस्थाप्योपतिष्ठेत जुष्टो दमूना इत्यथैनं परिसमूह्य परिस्तीर्य पर्युक्ष्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा सप्त व्याहृतीर्हुत्वा पुनरपि पूर्ववद्गृहीत्वा पूर्वं देवाः प्राणापानाविति द्वाभ्यां मा त्वा वृक्षौ संबाधिष्टां मा त्वा वृक्षौ संबाधेथामिति द्वाभ्यामग्ने अभ्यावर्तिन्नग्ने अङ्गिर इति द्वाभ्यां पुनरूर्जा सह रय्येति द्वाभ्यामयाश्चाग्ने ब्रह्मण एकहोतेति द्वाभ्यां क्रमेण चतुर्गृहीतानि हुत्वा पुनश्चतुर्गृहीतं गृहीत्वा महाव्याहृतीश्च जुहुयाद् एवमग्निमुत्पाद्य पूर्वोक्तेन विधिना दहनं कुर्यात्

## व्याकरणम्

प्रथमं सूत्रम्
वृद्धिरादैच्

अन्तिमसूत्रम्
अ अ इति

## निरुक्तः

प्रथमं सूत्रम्
समाम्नायः समाम्नातः । स व्याख्यातव्यः । तमिमं समाम्नायं निघण्टव इत्याचक्षते । निघण्टवः कस्मात् । निगमा इमे भवन्ति

अन्तिमसूत्रम्
नमो ब्रह्मणे । नमो महते भूताय । नमो यास्काय । ब्रह्मशुक्लमसीय ब्रह्मशुक्लमसीय

## छन्दः

म-य-र-स-त-ज-भ-न-ल-ग-संमितं भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः

परे पूर्णमिति

## ज्योतिषम्

अथैकदा मुनिश्रेष्ठं त्रिकालज्ञं पराशरम्
पप्रच्छोपेत्य मैत्रेयः प्रणिपत्य कृताञ्जलिः

एवं जातकवर्येऽत्र निविष्टा विषयाः शतम्
विज्ञाय विबुधास्त्वेतान्प्राप्नुवन्तु यशश्श्रियम्

## न्यायः

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजतिनिग्रस्थानानां तत्वज्ञानान्निश्श्रेयसाधिगमः

हेत्वाभासाश्च यथोक्ताः

## वैशेषिकः

अथातो धर्मं व्याख्यास्यामः

तद्वचनादाम्नायस्य प्रामाण्यमिति

## सांख्यः

अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः

यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः

## योगः

अथयोगानुशासनम्

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति

## कर्ममीमांसा

अथातो धर्मजिज्ञासा

अन्वाहार्ये च दर्शनात्

# वेदान्तः

अथातो ब्रह्मजिज्ञासा

अनावृत्तिः शब्दादनावृत्तिः शब्दात्

# गन्धर्ववेदः

ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे
सूरीणामनु रञ्जकः श्रुतिपदं योऽयं स्वयं राजते ।
यस्माद्ग्रामविभागवर्णरचनालङ्कारजातिक्रमो
वन्दे नादतनुं तमुद्धुरजगद्गीतं मुदे शङ्करम्

पुनरुक्तं कलाबाह्यं गतक्रममपार्थकम्
ग्राम्यं संदिग्धमित्येवं दश धा गीतदुष्टता

# धनुर्वेदः

अथोवाच महादेवो भार्गवाय च धीमते
तत्तेऽहं संप्रवक्ष्यामि यथातथ्येन संशृणु

ब्राह्मणार्थे गवार्थे वा स्त्रीणां बालवधेषु च
प्राणत्यागपरो यस्तु सवै मोक्षमवाप्नुयात्

# स्थापत्यवेदः

उत्पत्तिरक्षणलयान्जगतां प्रकुर्वन्भूवारिवह्निमरुतो गगनं च सूते
नानासुरेश्वरकिरीटविलोलमाला भृङ्गावलीढचरणाम्बुरुहं नमानि

पितामहेन्द्रप्रमुखैः समस्तैर्देवैरिदं शास्त्रवरं पुरोदितम्
तस्मात्समुद्धृत्य हि मानसारम् शास्त्रं कृतं लोकहितार्थमेतत्

# हारीतसंहिता

नत्वा शिवं परमतत्त्वकलाविरूढं ज्ञानामृतैकचटुलं परमात्मरूपम्
रागादिरोगशमनं दमनं स्मरस्य शश्वत्क्षपाधिपधरं त्रिगुणात्मरूपम्

यदा यदा शोषयते मलानामग्निस्तदा त्रिप्तिमिवातनोति
यदा च यस्यैव भवेदतृप्तिः तदैव तृष्णां प्रतनोति चेतः

# भेलसंहिता

पिप्पल्यो दीप्यकश्चैव तथा भूषिककर्णिकाः
बिल्वस्य पल्लवाः श्वेताहरिद्रा मथुकन्तथा

जीवकर्षभकौ मेदा बीजं निलोत्पलस्य च
गर्भेणानेन संसिद्धं चटकाण्डरसायुतम

# काश्यपसंहिता

किंवा लेहयितव्यं च किंवा लेहितलक्षणम्
अतिलेहितदोषाः के के च दोषा अलेहिते

करघाटशनानां च विवेहा मण्डपेषु च
कान्तारं च वराहं च घटास्वाभीरमेव च

# चरकसंहिता

अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्
अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते

# सुश्रुतसंहिता

अथातो वेदोत्पत्तिमध्यायं व्याख्यास्यामः

सहोत्तरं त्वेतदधीत्य सर्वं ब्राह्मं विधानेन यथोदितेन
न हीयतेऽर्थान्मनसोऽभ्युपेतादेतद्वचो ब्राह्ममतीव सत्यम्

## वाग्भट्टसंहिता

रागादिरोगान्सततानुषक्तानशेषकायप्रसृतानशेषान्
औत्सुक्यमोहारतिदाञ्जघान योऽपुर्ववैद्याय नमोऽस्तु तस्मै

हृदयमिव हृदयमेतत्सर्वायुर्वेदवाङ्मयपयोधेः
कृत्वा यच्छुभमाप्तं शुभमस्तुपरं ततो जगतः

## माधवनिदानसंहिता

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम्
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम्

यत्कृतं सुकृतं किञ्चित्कृत्वैवं रुग्विनिश्चयम्
मुञ्चन्तु जन्तवस्तेन नित्यमातङ्कसन्ततिम्

## शार्ङ्गधरसंहिता

श्रियं स दद्याद्भवतां पुरारिर्यदङ्गतेजः प्रसरे भवानी
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ

अल्पायुषामल्पधियामिदानीं कृतं समस्तश्रुतिपाठशक्त्या
तदत्र युक्तं प्रतिबीजमात्रमभ्यस्यतामात्महितं प्रयत्नात्

## भावप्रकाशसंहिता

गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारम्
गुरुमवगमनयनप्रदम् इष्टकरीम् इष्टदेवतां वन्दे

न केवलं दीर्घमिहायुरश्नुते रसायनं यो विधिवन्निषेवते
गतिं स देवर्षिनिषेवितां शुभां प्रपद्यते ब्रह्म तथैव चाक्षरम्

## उपनिषद्

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि वेदस्य म
आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेन अहोरात्रान्संदधामि
ऋतं वदिष्यामि सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु
अवतु मामवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः

स एतेन प्राज्ञेनात्मानस्माल्लोकादुत्क्रमिष्य अमुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वा
अमृतः समभवत् समभवत्

## आरण्यकम्

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु
ॐ शान्तिः शान्तिः शान्तिः

यदेकादशेऽहन्प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति । यद्द्वादशेऽहन्प्रवृज्यते । सोमो
भूत्वा सुत्यामेति । यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः
पराङमूँल्लोकाँस्तपन्नेति । यदुपरिष्टदुपसदां प्रवृज्यते ।
तस्मादमुतोऽर्वाङिमांल्लोकाँस्तपन्नेति । य एवं वेद । ऐव तपति

## ब्राह्मणम्

अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः
आग्नावैष्णवम्पुरोळाशं निर्वपन्ति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं
तद्देवताभ्योऽनन्तरायं निर्वपन्ति अग्निर्वै सर्वा देवता विष्णुः सर्वा देवताः

तस्य व्रतं न द्विषतः पूर्व उपविशेद्यदि तिष्ठन्तम्मन्येत तिष्ठेतैव न द्विषतः पूर्वं
संविशेद्यद्यासीनं मन्येत आसीतैव न द्विषतः पूर्वः प्रस्वप्याद्यदि जाग्रतम्मन्येत
जागृयादेवापि ह यद्यस्याश्ममूर्धा द्विषन्भवति क्षिप्रं हैवैनं स्तृणुते स्तृणुते

# इतिहासः

तपः स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम्

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्

# पुराणम्

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि

नामसम्कीर्तनं यस्य सर्वपापप्रणाशनम् ।
प्रणामो दुःखशमनं तं नमामि हरिं परम्

# स्मृतिः

मनुमेकाग्रमासीनमभिगम्य महर्षयः
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन्

इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम्

# ऋग्वेदप्रातिशाख्यम्

परावरे ब्रह्मणि यं सदाहुर्वेदात्मानं वेदनिधिं मुनीन्द्राः
तं पद्मगर्भं परमं त्वादिदेवं प्रणम्यर्चां लक्षणमाह शौनकः

यश्छन्दसां वेद विशेषमेतं भूतानि च त्रैष्टुभजागतानि
सर्वाणि रूपाणि च भक्तितो यः स्वर्गं जयत्येभिरथामृतत्वम्

## शुक्लयजुर्वेदप्रातिशाख्यम्
स्वरसंस्कारयोश्छन्दसि नियमः

वृद्धं वृद्धिः

## अथर्ववेदप्रातिशाख्यम्
अथातो न्यायाध्ययनस्य पार्षदं वर्तयिष्यामः

आम्नातव्यमनाम्नातं प्रपाठेऽस्मिन्क्वचित्पदम्
छन्दसोऽपरिमेयत्वात्परिषत्तस्य लक्षणं परिषत्तस्य लक्षणमिति

## अथर्ववेद चतुरध्यायिका
अथाङ्गिरसः चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपद्यौ गुणौ प्रातिज्ञम्

स एकपदः परिहार्यश्च परिहार्यश्च

## कृष्णयजुर्वेदप्रातिशाख्यम्
अथ वर्णसमाम्नायः

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम्  गच्छेदाचार्यसंसदमिति

## सामवेदप्रातिशाख्यम्
उच्चा मही पुना रवजये प्र त्वौशनं कया देव्यं स्वादि हितं पवस्वेन्द्रमच्छ सफष्कले पुरः

प्रस्ताव्येवासंततनिनः प्रस्ताव्येवासंततनिनः

इति महर्षिवैदिकवाङ्मयस्य  चत्वारिंशत्क्षेत्राणाम्  आदिरन्त्येन सहितपाठः